# mRityvaShTakam

# મૃત્યષ્ટકમ્

## Document Information

Text title : mRityvaShTakam

File name : mRityvaShTakam.itx

Category : aShTaka, deities_misc, vyAsa

Location : doc_deities_misc

Author : Vyasa

Transliterated by : sansknet

Source : shrIgAruDe mahApurANe adhyAya 233 mArkaNDeyakRitaM

Latest update : December 12, 2015

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 21, 2023

*sanskritdocuments.org*

# મૃત્વ્વષ્ટકમ્

ગારુડપુરાણાન્તર્ગતમ્

સૂત ઉવાચ ।
સ્તોત્રં તત્સં પ્રવક્ષ્યામિ માર્કણ્ડેયન ભાષિતમ્ । સ્તોત્રમ્ સર્વં
દામોદરં પ્રપન્નોઽસ્મિ કિન્નો મૃત્યુઃ કરિષ્યતિ ॥ ૧॥

શઙ્ખચક્રધરં દેવં વ્યક્તરૂપિણમવ્યયમ્ ।
અધોઅક્ષજં પ્રપન્નોઽસ્મિ કિન્નો મૃત્યુઃ કરિષ્યતિ ॥ ૨॥

વરાહં વામનં વિષ્ણું નારસિંહં જનાર્દનમ્ ।
માધવઞ્ચ પ્રપન્નોઽસ્મિ કિન્નો મૃત્યુઃ કરિષ્યતિ ॥ ૩॥

પુરુષં પુષ્કરક્ષેત્રબીજં પુણ્યં જગત્પતિમ્ ।
લોકનાથં પ્રપન્નોઽસ્મિ કિન્નો મૃત્યુઃ કરિષ્યતિ ॥ ૪॥

સહસ્રશિરસં દેવં વ્યક્તાવ્યક્તં સનાતનમ્ ।
મહાયોગં પ્રપન્નોઽસ્મિ કિન્નો મૃત્યુઃ કરિષ્યતિ ॥ ૫॥

ભૂતાત્માનં મહાત્માનં યજ્ઞયોનિમયોનિજમ્ ।
વિશ્વરૂપં પ્રપન્નોઽસ્મિ કિન્નો મૂત્યુઃ કરિષ્યતિ ॥ ૬॥

ઇત્યુદીરિતમાકર્ણ્ય સ્તોત્રં તસ્ય મહાત્મનઃ । સ્તવં તસ્ય
અપયાતસ્તતો મૃત્યુર્વિષ્ણુદૂતૈઃ પ્રપીડિતઃ ॥ ૭॥

ઇતિ તેન જિતો મૃત્યુર્માર્કણ્ડેયેન ધીમતા ।
પ્રસન્ને પુણ્ડરીકાક્ષે નૃસિંહે નાસ્તિ દુર્લભમ્ ॥ ૮॥

મૃત્વ્વષ્ટકમિદં પુણ્યં મૃત્યુપ્રશમનં શુભમ્ ।
માર્કણ્ડેયહિતાર્થાય સ્વયં વિષ્ણુરુવાચ હ ॥ ૯॥

ઇદં યઃ પઠતે ભક્ત્યા ત્રિકાલં નિયતં શુચિઃ ।
નાકાલે તસ્ય મૃત્યુઃ સ્યાન્નરસ્યાચ્યુતચેતસઃ ॥ ૧૦॥

હૃત્પદ્મમધ્યે પુરુષં પુરાણં
　　નારાયણં શાશ્વતમપ્રમેયમ્ ।
વિચિન્ત્ય સૂર્યાદતિરાજમાનં
　　મૃત્યું સ યોગિ જિતવાંસ્તથૈવ ॥ ૧૧॥

ઇતિ શ્રીગારુડે મહાપુરાણે માર્કણ્ડેયકૃતં
મૃત્યુષ્ટકસ્તોત્રકતહ્ન નામ
ત્રયસ્ત્રિંશદુત્તરદ્વિશતતમોઽધ્યાયઃ

Garuda Purana pUrvakhaNDa adhyAya 233 (225 varied.)

---

*mRityvaShTakam*

pdf was typeset on January 21, 2023

Please send corrections to *sanskrit@cheerful.com*